श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## सप्तचत्वारिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## सप्तचत्वारिंशः सर्गः

*रावणेरक्षस्य पराक्रमो वधश्च*

सेनापतीन् पञ्च स तु प्रमापितान्
हनूमता सानुचरान् सवाहनान्।
निशम्य राजा समरोद्धतोन्मुखं
कुमारमक्षं प्रसमैक्षताक्षम्॥ ५.४७.१ ॥

स तस्य दृष्ट्यर्पणसम्प्रचोदितः
प्रतापवान् काञ्चनचित्रकार्मुकः।
समुत्पपाताथ सदस्युदीरितो
द्विजातिमुख्यैर्हविषेव पावकः॥ ५.४७.२ ॥

ततो महान् बालदिवाकरप्रभं
प्रतप्तजाम्बूनदजालसन्ततम्।
रथं समास्थाय ययौ स वीर्यवान्
महाहरिं तं प्रति नैर्ऋतर्षभः॥ ५.४७.३ ॥

ततस्तपःसङ्ग्रहसञ्चयार्जितं
प्रतप्तजाम्बूनदजालचित्रितम्।
पताकिनं रत्नविभूषितध्वजं
मनोजवाष्टाश्ववरैः सुयोजितम्॥ ५.४७.४ ॥

सुरासुराधृष्यमसङ्गचारिणं
तडित्प्रभं व्योमचरं समाहितम्।
सतूणमष्टासिनिबद्धबन्धुरं
यथाक्रमावेशितशक्तितोमरम्॥ ५.४७.५ ॥

www.prapatti.com

विराजमानं प्रतिपूर्णवस्तुना
सहेमदाम्ना शशिसूर्यवर्चसा।
दिवाकराभं रथमास्थितस्ततः
स निर्जगामामरतुल्यविक्रमः॥ ५.४७.६ ॥

स पूरयन् खं च महीं च साचलां
तुरङ्गमातङ्गमहारथस्वनैः।
बलैः समेतैः सह तोरणस्थितं
समर्थमासीनमुपागमत् कपिम्॥ ५.४७.७ ॥

स तं समासाद्य हरिं हरीक्षणो
युगान्तकालाग्निमिव प्रजाक्षये।
अवस्थितं विस्मितजातसम्भ्रमं
समैक्षताक्षो बहुमानचक्षुषा॥ ५.४७.८ ॥

स तस्य वेगं च कपेर्महात्मनः
पराक्रमं चारिषु रावणात्मजः।
विचारयन् स्वं च बलं महाबलो
युगक्षये सूर्य इवाभिवर्धत॥ ५.४७.९ ॥

स जातमन्युः प्रसमीक्ष्य विक्रमं
स्थितः स्थिरः संयति दुर्निवारणम्।
समाहितात्मा हनुमन्तमाहवे
प्रचोदयामास शितैः शरैस्त्रिभिः॥ ५.४७.१० ॥

ततः कपिं तं प्रसमीक्ष्य गर्वितं
जितश्रमं शत्रुपराजयोचितम्।
अवैक्षताक्षः समुदीर्णमानसं
सबाणपाणिः प्रगृहीतकार्मुकः॥ ५.४७.११ ॥

स हेमनिष्काङ्गदचारुकुण्डलः
समाससादाशुपराक्रमः कपिम्।

तयोर्बभूवाप्रतिमः समागमः
सुरासुराणामपि सम्भ्रमप्रदः॥ ५.४७.१२ ॥

ररास भूमिर्न तताप भानुमान्
ववौ न वायुः प्रचचाल चाचलः।
कपेः कुमारस्य च वीर्यसंयुगं
ननाद च द्यौरुदधिश्च चुक्षुभे॥ ५.४७.१३ ॥

स तस्य वीरः सुमुखान् पतत्रिणः
सुवर्णपुङ्खान् सविषानिवोरगान्।
समाधिसंयोगविमोक्षतत्त्ववि-
च्छरानथ त्रीन् कपिमूर्ध्न्यताडयत्॥ ५.४७.१४ ॥

स तैः शरैर्मूर्ध्नि समं निपातितैः
क्षरन्नसृग्दिग्धविवृत्तनेत्रः।
नवोदितादित्यनिभः शरांशुमान्
व्यराजतादित्य इवांशुमालिकः॥ ५.४७.१५ ॥

ततः प्लवङ्गाधिपमन्त्रिसत्तमः
समीक्ष्य तं राजवरात्मजं रणे।
उदग्रचित्रायुधचित्रकार्मुकं
जहर्ष चापूर्यत चाहवोन्मुखः॥ ५.४७.१६ ॥

स मन्दराग्रस्थ इवांशुमाली
विवृद्धकोपो बलवीर्यसंवृतः।
कुमारमक्षं सबलं सवाहनं
ददाह नेत्राग्निमरीचिभिस्तदा॥ ५.४७.१७ ॥

ततः स बाणासनशक्रकार्मुकः
शरप्रवर्षो युधि राक्षसाम्बुदः।
शरान् मुमोचाशु हरीश्वराचले
वलाहको वृष्टिमिवाचलोत्तमे॥ ५.४७.१८ ॥



www.prapatti.com

कपिस्ततस्तं रणचण्डविक्रमं
  प्रवृद्धतेजोबलवीर्यसायकम्।
कुमारमक्षं प्रसमीक्ष्य संयुगे
  ननाद हर्षाद् घनतुल्यनिःस्वनः॥ ५.४७.१९ ॥

स बालभावाद् युधि वीर्यदर्पितः
  प्रवृद्धमन्युः क्षतजोपमेक्षणः।
समाससादाप्रतिमं रणे कपिं
  गजो महाकूपमिवावृतं तृणैः॥ ५.४७.२० ॥

स तेन बाणैः प्रसभं निपातितै-
  श्चकार नादं घननादनिःस्वनः।
समुत्सहेनाशु नभः समारुजन्
  भुजोरुविक्षेपणघोरदर्शनः॥ ५.४७.२१ ॥

तमुत्पतन्तं समभिद्रवद् बली
  स राक्षसानां प्रवरः प्रतापवान्।
रथी रथश्रेष्ठतरः किरञ्छरैः
  पयोधरः शैलमिवाश्मवृष्टिभिः॥ ५.४७.२२ ॥

स ताञ्छरांस्तस्य हरिर्विमोक्षयं-
  श्चचार वीरः पथि वायुसेविते।
शरान्तरे मारुतवद् विनिष्पतन्
  मनोजवः संयति भीमविक्रमः॥ ५.४७.२३ ॥

तमात्तबाणासनमाहवोन्मुखं
  खमास्तृणन्तं विविधैः शरोत्तमैः।
अवैक्षताक्षं बहुमानचक्षुषा
  जगाम चिन्तां स च मारुतात्मजः॥ ५.४७.२४ ॥

ततः शरैर्भिन्नभुजान्तरः कपिः
  कुमारवीर्येण महात्मना नदन्।

महाभुजः कर्मविशेषतत्त्वविद्
विचिन्तयामास रणे पराक्रमम्॥ ५.४७.२५ ॥

अबालवद् बालदिवाकरप्रभः
करोत्ययं कर्म महन्महाबलः।
न चास्य सर्वाहवकर्मशालिनः
प्रमापणे मे मतिरत्र जायते॥ ५.४७.२६ ॥

अयं महात्मा च महांश्च वीर्यतः
समाहितश्चातिसहश्च संयुगे।
असंशयं कर्मगुणोदयादयं
सनागयक्षैर्मुनिभिश्च पूजितः॥ ५.४७.२७ ॥

पराक्रमोत्साहविवृद्धमानसः
समीक्षते मां प्रमुखोऽग्रतः स्थितः।
पराक्रमो ह्यस्य मनांसि कम्पयेत्
सुरासुराणामपि शीघ्रकारिणः॥ ५.४७.२८ ॥

न खल्वयं नाभिभवेदुपेक्षितः
पराक्रमो ह्यस्य रणे विवर्धते।
प्रमापणं ह्यस्य ममाद्य रोचते
न वर्धमानोऽग्निरुपेक्षितुं क्षमः॥ ५.४७.२९ ॥

इति प्रवेगं तु परस्य तर्कयन्
स्वकर्मयोगं च विधाय वीर्यवान्।
चकार वेगं तु महाबलस्तदा
मतिं च चक्रेऽस्य वधे तदानीम्॥ ५.४७.३० ॥

स तस्य तानष्ट वरान् महाहयान्
समाहितान् भारसहान् विवर्तने।
जघान वीरः पथि वायुसेविते
तलप्रहारैः पवनात्मजः कपिः॥ ५.४७.३१ ॥

www.prapatti.com

ततस्तलेनाभिहतो महारथः
    स तस्य पिङ्गाधिपमन्त्रिनिर्जितः।
स भग्ननीडः परिवृत्तकूबरः
    पपात भूमौ हतवाजिरम्बरात्॥ ५.४७.३२ ॥

स तं परित्यज्य महारथो रथं
    सकार्मुकः खड्गधरः खमुत्पतन्।
ततोऽभियोगादृषिरुग्रवीर्यवान्
    विहाय देहं मरुतामिवालयम्॥ ५.४७.३३ ॥

कपिस्ततस्तं विचरन्तमम्बरे
    पतत्रिराजानिलसिद्धसेविते।
समेत्य तं मारुतवेगविक्रमः
    क्रमेण जग्राह स पादयोर्दृढम्॥ ५.४७.३४ ॥

स तं समाविध्य सहस्रशः कपि-
    र्महोरगं गृह्य इवाण्डजेश्वरः।
मुमोच वेगात् पितृतुल्यविक्रमो
    महीतले संयति वानरोत्तमः॥ ५.४७.३५ ॥

स भग्नबाहूरुकटीपयोधरः
    क्षरन्नसृङ्निर्मथितास्थिलोचनः।
सम्भिन्नसन्धिः प्रविकीर्णबन्धनो
    हतः क्षितौ वायुसुतेन राक्षसः॥ ५.४७.३६ ॥

महाकपिर्भूमितले निपीड्य तं
    चकार रक्षोऽधिपतेर्महद्भयम्।
महर्षिभिश्चक्रचरैः समागतैः
    समेत्य भूतैश्च सयक्षपन्नगैः।
सुरैश्च सेन्द्रैर्भृशजातविस्मयै-
    र्हते कुमारे स कपिर्निरीक्षितः॥ ५.४७.३७ ॥

निहत्य तं वज्रिसुतोपमं रणे
    कुमारमक्षं क्षतजोपमेक्षणम्।
तदेव वीरोऽभिजगाम तोरणं
    कृतक्षणः काल इव प्रजाक्षये॥ ५.४७.३८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः॥

www.prapatti.com